इष्टत्वेनभानोपिस्वर्गकामादिपदैकदेशोपस्थितस्वर्गत्वावच्छिन्नस्यविध्यर्थैकदेशेइष्टेऽभेदान्वयात्प्रवर्तकज्ञान
निर्वाहः इतितदपिनसत् इतिशब्दैकदेशेइतराः नन्वनियमात्स्वर्गत्वादिप्रकारेणकामनाधीनप्रवृत्तौस्वर्गा-
दिविशेषितफलसाधनताज्ञानस्यहेतुतयाऽभेदेनस्वर्गादिविशेषितफलसाधनताज्ञानस्यानुपयोगित्वाच्च अ-
भेदेनस्वर्गादिप्रकारकस्वर्गादिष्टसाधनताज्ञानमपिस्वर्गत्वादिप्रकारकप्रवृत्तौहेतुः अतएवस्वर्गकामोयजेतेत्या दि

तः प्रवृत्तिरितित्वनमुक्तम् स्वर्गत्वप्रकारककामनायाः अधिकरणनिर्वाहानुपपत्तेः अथेष्टत्वस्य षष्ठ्योपलक्षा-
णत्वेन दृष्टाभाननिर्वाहेऽपि स्वर्गत्वादेरावषयभाननसंभवति अशाब्दस्यभानोपगमेऽतिप्रसंगादितिचेत् स्वर्गत्वा-
द्यवच्छिन्नसमभ्याहृतकामनाविषयत्वज्ञानसहकृतस्य तादृशकामनापिप्रत्ययावच्छिन्नशक्तिज्ञानस्य स्वर्गत्वा-
दिप्रकारकशाब्दधीहेतुत्वोपगमेऽतिप्रसंगानवकाशात् वस्तुतस्तादृशकामनाविषयतावच्छेदकत्वोपलक्षि-
तस्वर्गत्वादिविशिष्टसाधनत्वे शक्तिस्वीकारात्सर्वसामंजस्यं नचस्वर्गादिविशिष्टसाधनत्वस्यविधिप्रत्ययवाच्य-
त्वंनसंभवति स्वर्गत्वादेर्गंगास्नानादिजन्यस्वर्गादिसाधारण्येनयागादिजन्यतावच्छेदकतयायागादौ स्वर्गत्वावि-
शिष्टसाधनत्वबाधात् नहिजन्यतावच्छेदकधर्मोजन्यत्वनिरूपकेविशेषणमितिवाच्यम् स्वर्गत्वादेःशक्यावि-

मुवा· १८

प्रोक्षणत्वेपितदुपलक्षितत्वेजात्यनिरूपितजनकतायायागादावबाधितायाः स्वर्गादिजननतात्वेनविधिप्रत्ययतोभानसं
भवात् घटत्वादिविशिष्टवाचकपदघटितात् घटंद्रव्यत्वेनजानातीत्यादिवाक्यात् घटत्वाद्युपलक्षितघटादिविशे
ष्यकत्वभानवत् नचतद्धर्मावच्छिन्ननिरूपिततत्साधनत्वज्ञानंविनातद्धर्मप्रकारकफलेच्छाधीनप्रवृत्त्यनिर्वाहइ-
तिशक्यम् वह्निरित्यादिप्रकारकेच्छातोपितृणादिसमवधानेऽभ्रांतप्रवृत्तेरानुभाविकत्वात् भूयःस्ववार्थि-
नामपिधर्मंविनाक्रियाविशेषप्रवृत्तेश्च तद्धर्मावच्छिन्नफलार्थिप्रवृत्तौतद्धर्मप्रकारेणभासमानफलेप्रतिसाध
नताज्ञानस्यप्रवर्तकत्वात् सचधर्मःकार्यतावच्छेदकतयाभासमानतदुपलक्षणतयैववेत्यन्यदेतत् नद्विवा-
क्षित्यादिकेतृणादिजन्यतावच्छेदकंव्यभिचारिसाधारणत्वात् नवाभूयस्त्वादिकंकस्यचिज्जन्य ॥ ॥

तावच्छेदकग्रहवशासंपन्नत्वात् एवंसतिघटत्वावच्छिन्नफलार्थीतत्वादौकथंनप्रवर्ततेतत्वादेरपिघटत्वाद्युपा
लिङ्गितजन्यत्वसत्त्वादिविशिष्टनिरूपितद्वयत्वावच्छिन्नसाधनतासत्वादितिचेत् फलाद्युपधाननिश्चयात्सत्त्वाते
षेणाप्रवृत्तिप्रतिबंधकत्वात् फलोपधायकसाधनत्वस्यवाविधिप्रत्ययार्थतावच्छेदकामत्त्वमुपादादौतत्पादि
र्नप्रयोगः नचतथापिस्वर्गत्वादेर्यागादिनिष्ठकारणतावच्छेदकव्यापकतानिरूपकतानवच्छेदकतयास्वर्गत्वाव
च्छिन्ननिरूपितव्यापकतावच्छेदकतकारणतायाः बाधः स्वर्गादिनिष्ठकार्यतावच्छेदकवैजात्यस्यचकारणत्वाद्युपरोत्तर
कालत्वेकात्म्येनप्रागभावप्रतियोगितावच्छिन्ननिरूपितव्याप्यव्यापकभावोयासंभवइतिस्वर्गकामइत्यादौविध्यर्थबोधा
नुपपत्तिर्दुर्वारैवेतिवाच्यम् स्वरूपसंबंधरूपायाएवकारणतायाविध्यर्थत्वोपगमात् प्रमयासिद्धिनिरूपकतान

मु॰वा॰ वच्छेदकनियतोत्तरवर्त्तितावच्छेदकधर्मवत्त्वस्वर्गकत्वमेवस्वर्गकारणत्वंनियतोत्तरवर्त्तितावच्छेदकस्यधर्मोवि
१८ शिष्यउत्तरकालेकरणेजातिविशेषएवनियतोत्तरवर्त्तितावच्छेदकत्वेनसामान्यरूपेणशाब्दबोधोपासते नि
16 यतोत्तरवर्त्तितावच्छेदकत्वंचकारणतावच्छेदकत्वाभिमतधर्मावच्छिन्नव्यापारान्तराभावाधिकरणतावि
शिष्टेसतितत्क्षणविच्छिन्नाधिकरणतानिरूपकतानवच्छेदकत्वं अधिकरणतावैशिष्ट्यंचस्वावच्छेदकक्षणाव्य
वहितोत्तरक्षणावच्छिन्नस्वाश्रयनिष्ठत्वसंबंधेन वस्तुतः स्वर्गनिष्ठधर्मावच्छिन्ननिरूपितनियतपूर्ववर्त्तिताव
च्छेदकधर्मवत्त्वमेवस्वर्गकारणत्वं नियतपूर्ववर्त्तितावच्छेदकत्वंचाव्यवहितपूर्वकालावच्छिन्नवृत्तिकाभाववद्
त्तिदैशिकीयव्यापकतायाः स्वाश्रयत्वस्वाश्रयनिरूपितव्यापारवत्त्वान्यतरसंबंधेनावच्छेदकत्वमेवव्याप ॥ १८

कत्वस्यभस्यनीलाभसंभवादिचेत् सत्यंकाष्ठंभस्मक्रियतइत्यादौभस्मादिनिर्वर्त्यकर्मतायालकारेणानभिधानेपि
तत्कर्मतायाधात्वर्थसंसर्गतयाभानोपगमेनताद्दशकर्मान्तरं प्रथमायाःसाधुताप्रातिपदिकार्थविशेष्यतयाकर्मत्वा
दिविवक्षायामेवद्वितीयादिविभक्तेःसाधुत्वात् यथाऽचैत्रोनमइत्यादौनमःपदार्थत्यागेऽचैत्रादिकर्मकत्वबोधेप्रचैत्रादि
पदान्तरार्थस्यैवनिपातार्थत्यागेकर्मतासंबंधेनैवनामार्थस्यान्वयात् एवंभूतत्वेनघटइत्यादावपिघटादिसंबंधस्या
भावेसंसर्गतयाभानात्षष्ठीविषयेपिप्रथमानवयात्वर्थेनामार्थस्यसाक्षादन्वयोऽव्युत्पन्नइतिप्रकृतेकर्मतायाःसं
सर्गतयाभानेनसंभवतीतिवाच्यम् घटोनीलोभवतिकाष्ठंभस्मभवतीत्यादौभावनादिक्रियायांनीलादेःकर्तृता
संबंधेनसाक्षादन्वयवद्यापिव्युत्पत्तिवैचित्र्येणकर्मान्तरविशेषणतापन्नक्रियायामपरकर्मणः कर्मतासं

सु·वा·
१७
17

बंधेनसाक्षात्वादन्वयोपगमात् नचैवमपिकर्मत्वस्यप्रकृत्यर्थविशेष्यत्वेनविवक्षायांकाष्ठंभस्मराशिंक्रियतइत्यादिप्र
योगापत्तिः कर्मत्वांतरविशेषणतानापन्नक्रियायामेवद्वितीययाकर्मत्वंबोध्यइतिव्युत्पत्तिकल्पनेगोर्दुह्यतेक्षी
रमजानीयतेग्राममित्यादौदोहनत्वनयनादिक्रियायाःक्षीरग्रामादिकर्मकत्वान्वयप्रसंगइतिवाच्यं प्रकृतिविकृ
त्युभयकर्मस्थलेतथाव्युत्पत्तिः यथोक्तातिप्रसंगवारणायदर्शिताव्युत्पत्तिः कल्प्यते तथाकर्तृत्वविशेषण
तयाऽभासमानायामेवक्रियायांतृतीयार्थकर्तृत्वान्वयइत्यपिव्युत्पत्तिः कल्प्या अन्यथाप्रकृत्यर्थविशेष्यतयाक
र्तृत्वविवक्षयाकाष्ठंभस्मनाभवतीतिप्रयोगस्यदुर्वारत्वात् इत्यत्रप्रयोजकनाशप्रतियोगित्वरूपविकारएवकाष्ठं
भस्मभवतीत्यादौधात्वर्थस्तदाश्रयत्वरूपंतत्कर्तृत्वमेवसंबंधमर्यादयाभासतेइतिव्युत्पत्तिरितिकाष्ठेनभस्मनाभूयतइत्या दौभ १७

स्याधाराधेयत्वसम्बन्धेनौकाष्ठाधाराधेयत्वं च नाशप्रतियोगित्वेन तृतीयोपस्थाप्यप्रकारतया भासते कर्तृत्वविशेषणतया
भासमानस्य निरूढभवनस्यांतर्गतायामेवोन्मनीभस्मादेराधेयत्वसंबंधेन तया भासत इति व्युत्पत्तेः काष्ठेन भस्म भूय-
त इत्यादयो न प्रयोगाः भावाख्यातस्य कर्तृत्वाबोधकत्वात् कर्मत्वांतरविशेषणतानापन्नकृत्याद्यैकर्मकत्वस्य संस-
र्गतया भानमनुपपन्नमिति काष्ठं भस्मराशिः करोतीत्यादयो न प्रयोगाः अधिशीङ्स्थासां कर्मेत्यादिनाऽऽधारस्य
कर्मसंज्ञानत्वाधारत्वमाधेयत्वं वा द्वितीयार्थः स्थलीमधिशेते इत्यादौ तादृशार्थे द्वितीयायाः स्थल्यामधिशयित इत्या-
दौ कृद्योगे षष्ठ्याश्च साधुत्वार्थमेवाधारस्य कर्मसंज्ञाविधानात् अथ कृञर्थव्यापारजन्यक्रियांतरं धात्वर्थेन भाव-
शोषणादिरूपफलावच्छिन्नव्यापारार्थकस्योपसर्गशीप्रभृतिधात्वर्थतावच्छेदकशोषणादिफलाश्रयतयाधारस्य

सु॰वा॰ स्यकर्मतोपपादनसंभवात्तादृशसूत्राणांवैयर्थ्यमेवअध्याद्युपसृष्टशीप्रभृतीनामेवतादृशार्थेनिष्फलत्वमान
१८ त्वनुपसृष्टानामतोनस्थलींशेतइत्यादयः स्वारसिकप्रयोगाइतिचेन्नथातोमुख्यार्थपरत्वेपिदर्शितप्रयोगनिर्वाहा
18 यभगवतापाणिनिमुनिनातादृशसूत्रप्रणयनात् तदप्रणीतवतांसर्ववर्मप्रभृतीनांमुख्यार्थपराणांस्थल्या
मधिशेतेइत्यादिप्रयोगानांसाधुतायाउर्वीरत्वाच्च कालाध्वदेशानामकर्मकक्रियायोगेकैश्चित्कर्मप्रत्ययार्थवि
भाषयाकर्मत्वमनुशिष्यते अनेन क्रियांतरांतर्भावेणोक्तरीत्यातत्रपाक्षिकंकर्मप्रत्ययमुपपादयंतस्तत्रानुर
शासति उक्तंचतैः कालभावाध्वदेशानांमंतर्भूतक्रियांतरैः सर्वैरकर्मकैर्योगेकर्मत्वमुपजायतेइति तन्मा। १८
नेवमासमधीतेमासमास्तेयोजनंधावतीत्यादौअपिव्याप्त्यर्थेकालाध्वनोरित्यनेनद्वितीयाविधानेयद्यप्य।

नर्थकंधात्वर्थेऽध्ययनस्थित्यादिविशेषणतयाऽभिव्यापनात्मकक्रियायामंतर्भावेणतत्कर्मतयातत्रद्वितीयोपपत्तेः
तादृशधात्वर्थव्याप्त्यनंतर्भावेमासमास्तेइत्यादौद्वितीययानद्योधनेपिग्रामस्पतेमासइत्यादौस्थित्यादिव्याप्यत्वलाभा
निर्वाहात् तथापिमासंरमणीयाक्रोशंकुटिलानदीत्यादौभवतीत्यस्मात्तथाहारेपिद्वितीयायाः साधुतानिर्वा
हकत्वेनभाष्यकृतस्तत्सूत्रमार्थकंयंति नत्रहिरमणीयत्वाभिव्याप्यत्वंमासादौप्रतीयते नचतत्रक्रियासमभि
व्याहारोस्तियत्राभिव्याप्तेरंतर्भविष्यतितत्कर्मतयाचद्वितीयास्यात् एवंमासमासितेत्यादौअभिव्याप्त्यंतर्भावेण
मासस्यकर्मत्वोपपादनेपिकृयोगात्षष्ठ्येवस्यात्नद्वितीयाइत्यतोपितत्सूत्रंसार्थकं अथकेयमभिव्याप्तिर्या
ऽत्यंतसंयोगइत्युच्यते नतावद्व्याप्यवृत्तिःकालिकःसंबंधः कालिकसंबंधस्यव्याप्यवृत्तित्वेआप्यकालानवच्छिन्नत्वेदि

मु॰वा॰ वसादिमात्रवृत्तिर्मासादिनिष्ठः संबंधोदिवसाद्यवच्छिन्न इतितत्रमासमासत्वे इतिनप्रयोगः मासपदार्थस्यात्रत्रिंशदि
१९ नस्थायीकश्चिदखंडपदार्थः नतत्क्रियाप्रचयः तथासतिदिनैकादिमात्रस्थायिनोपिसंबंधस्यकास्त्वचित्क्रिया
19 स्वव्याप्यवृत्तितयातत्रतथाव्यवहारापत्तेरितिमुक्तं चैत्रोमासंकाश्यांतिष्ठतीत्यादौकाशीसंयोगस्यमासव्यापका
स्यैकस्याभावेप्रमाणाप्रसंगात् संयोगव्यक्तीनांमासनिष्ठकालिकसंबंधस्यावांतरदंडात्मककालावच्छिन्नत्वात्
नचसंयोगानांभेदेपिद्वैतीयसंयोगत्वाद्यवच्छिन्ननिरूपिताकालिकसंबंधावच्छिन्नाधारतामासव्यापिकापकेवसा
वनावांतरकालावच्छिन्नेतितत्रतदनवच्छिन्नताबोधकमुक्तवाक्यंभवेदेवप्रमाणमितिवाच्यंसामान्यतइतिवि १९
शेषधर्मावच्छिन्नाधिकरणताकूटादेवसामान्यधर्मावच्छिन्नवत्ताप्रत्ययोपपत्तेः मुक्तसामान्यधर्मावच्छि

त्त्विनिरूपिताधिकरणतायामतिरिक्तायांमानाभावात् यत्रत्रिंशद्दिनेषुकमपिकमपिकालमधीतंतत्रमासेऽध्ययनसं
बंधसामान्यप्रवृत्तितयामासमधीतमितिप्रयोगानुपपत्तिरपिनशक्यतेवारयितुमुच्यते अभिव्याप्तिर्यावदवयवसंबंधः
यत्समुदायोमासादिपदार्थस्तएवतदवयवाः एवंच त्रिंशद्दिनानांमासपदार्थतयात्रिंशत्स्वदिनेषुकिंचित्कालावच्छे
देनाध्ययनसंबंधेपिमासमधीतमितिप्रयोगोपपत्तिः त्रिंशद्दिनसंबंधस्यदिनपर्याप्तत्रिंशत्वव्यापकत्वेतादृशत्वादेश्च
मासादिपदप्रवृत्तिनिमित्तस्यमासादिपदादेवलाभाद्व्यापकत्वमात्रंद्वितीयार्थः व्यापकत्वेचव्याप्यविशेषाघटित
मत्वंतुदुर्वचमितिस्वेएउशोऽभावप्रतियोगितावच्छेदकत्वमभावश्चद्वितीयार्थः प्रथमाभावेप्रकृत्यर्थोमासादि
रार्थयत्तासंबंधेनान्वेतिमासादिनिष्ठाभावप्रतियोगितावच्छेदकत्वत्वावच्छिन्नस्यचप्रतियोगितया ॥ ॥

मु॰वा॰ २०

भावांतरेन्वयः तस्य चान्वयितावच्छेदकं चैत्रकर्तृकाध्ययनत्वादिरूपस्वाश्रयत्वादितिसंबंधेनाध्ययनादावन्वयः प्रथ
माभावे प्रतियोगिव्यधिकरणत्वविशेषणमुपादेयं तेन त्रिंशद्दिनेषु चैत्रयत्राधीतं तत्र दिनावांतरदंडावच्छेदेनाध्ययनाभावे
पि उक्तप्रयोगोपपत्तिः मासपदं च त्रिंशद्दिनपरमेव नतु तावत्कालस्याप्यखंडवस्त्वंतरपरं एकदिनाध्ययनस्थ
लेपि तादृशखंडकाले प्रतियोगिव्यधिकरणाध्ययनाभावासत्त्वेन मासमधीत इति प्रयोगापत्तेः मासश्चट
कं च दिनं सूर्योदयावधिसूर्योदयांतरस्याप्यखंडवस्तुपरं न तु क्रियादिप्रचयः तथा सत्येकैकक्रियादि
व्यक्तेरपि मासत्वाधिकरणतया तत्र प्रतियोगिव्यधिकरणाध्ययनाद्यभावसत्त्वेन व्यापकत्वरूपद्वितीयार्थ २०
स्य बाधापत्तेः दिवसं स्वपितीत्यादौ दिवसादिपदं सूर्योदयावधिसूर्योदयांतरपर्यंततत्क्षणकूटपरमेव अतो नैकदेश

दिमात्रस्वमेतथाप्रयोगः अथव्यापकत्वस्यद्वितीयार्थत्वेपकमासादिव्यापकाध्ययनस्थलेपिमासांतरेध्ययनाभा
वत्वेनमासव्यापकतायाअध्ययनेबाधेनमासमधीतइत्याद्यनुपपत्तिः नवमासपदेनयत्किंचित्त्रिंशद्दिनमात्रग्रा
ह्यविशेषवत्त्वप्रकारेणानुपस्थानेपितद्धर्मवत्त्वनिरूपिताधेयत्वसंबंधेनमासपदार्थस्याभावेऽन्वयोपगमा
त्यत्किंचिन्मासनिष्ठाभावप्रतियोगितानवच्छेदकत्वमन्वयितावच्छेदकेलभ्यतइतिनक्वाप्यनुपपत्तिरितिवाच्यं
तत्तन्मासमात्रवृत्तिधर्मविशेषाणांसंबंधघटकत्वेपिशाब्दबोधेसंसर्गतात्पर्यज्ञानस्यहेतुतयासंसर्गविशेषोप
स्थितेरपेक्षितत्वात्संबंधघटतादृशधर्मान्विशेष्याविदुषः शाब्दबोधानुदयप्रसंगात् नचेष्टापत्तिरनुभवविरो
धात् प्रत्नागतादिमासवृत्तितादृशधर्माणांविशिष्यज्ञानसामग्र्याअस्माकंदुर्लभतयाऽस्मदादीनांसर्वेषामेवतादृश

मु॰वा॰ मासव्यापकताबोधोच्छेदप्रसंगात् नचवाक्यार्थतात्पर्यमेव संसर्गतात्पर्यं तज्ज्ञाने च वाक्यार्थघटकः संबंधः संस
२१ र्गमर्यादयैव भासत इति विशेषकरूपेणानुपस्थितस्यैवोक्तधर्मघटितसंबंधस्य तात्पर्यज्ञाने बाधाभावबलात् शा
21 ब्दबोधे च तात्पर्यज्ञानबलाज्ज्ञानमनपवादमेवेति वाच्यम् एकपदार्थविशिष्टापरपदार्थरूपवाक्यार्थविशेषितत
त्प्रतीतीच्छारूपतात्पर्यविषयकनिश्चयस्य प्राग्वाक्यार्थानिश्चये दुर्घटतया तस्य शाब्दधीहेतुत्वे योग्यतासंशयाच्छा
ब्दबोधानुपपत्तेर्विशकलिततत्तत्पदार्थतत्संसर्गविषयकत्वविशेषितप्रतीतीच्छाज्ञानस्यैव शाब्दधीहेतुतायाउ
पेयत्वात् तत्र च संसर्गोपस्थितेरवश्यापेक्षणीयत्वादिति चेत्सत्यम् मासादिघटकतावदिनादिनिष्ठत्रिंशत्त्वादिरू २१
पं मासत्वादि मासादिभेदेन तान्नैव मासादिपदप्रवृत्तिनिमित्ततापरमनुगतरूपेण अन्यथाशक्यानन्त्यप्रसंगात्।

सर्वोपसंहारेणानुत्पत्तिं विनाशाप्रतीतमासादेः प्राग्ध्वानुभवानिर्वाहाच्च नच त्रिंशत्त्वादिकं त्रुटिविशेषविषयत्वरूपं वा
च्यं दिनादेरैक्यानात्मत्वेन त्रुटिगणरूपसंख्यायासंभवात् क्रमिकेषु तेषु संख्योत्पत्तेरसंभवात् तत्र च त्रुटेरनतिप्रसक्तैवेल
क्षणरूपमनुगतं दुर्निर्वचं जातिरूपस्य तस्य संकरप्रसंगनिरस्तत्वात् तत्तद्दिनविषयकत्वरूपस्य तद्दिनाद्यननुगमेनान-
नुगतत्वादिति वाच्यं तावत्कालस्थायिनो द्रव्यस्यापि दिनादिरूपतासंभवात् मीमांसकानुयायिभिः संख्यायाः पदा-
र्थान्तरत्वोपगमात् गम्यमानस्यैवाश्रयणात् संख्यारूपस्य दिनादिनिष्ठानुगतत्रिंशत्त्वादेरेव वचनात् एवं च मासम-
धीते चैत्र इत्यादौ अधिकरणत्वं द्वितीयार्थः मासादिपदार्थतावच्छेदकदिनपर्याप्तत्रिंशत्त्वादेर्धर्मिविशेषणता-
पन्नस्य द्वितीयार्थाधिकरणतायां चैत्रकर्तृकाध्ययनाधारत्वादिः आप्यधर्मावच्छिन्नस्वरूपसंबंधरूपमेव।

कु·वा· च्छेयत्वसंबंधतयास्तनेऽभ्युपगमेनसामंजस्यात् यत्किंचिदेकमासंआध्ययत्राधीतंतत्राध्ययनाधारतानामव
२२ च्छेयताच्छेदकाधारताद्यन्तमत्वविशेषादिरूपोक्तधर्मावच्छिन्नानतिप्रसक्तेनतत्त्रिंशत्वेनावच्छेदात्न्यू
नकालाध्ययनस्थलेवातिप्रसक्तत्वयातादृशमासत्वस्योक्तरूपावच्छिन्नाधारतानवच्छेदकत्वाद्याप्रसंगयोरनव
काशात् मासादिपदप्रवृत्तिनिमित्तधर्मैश्चैत्राद्यध्ययनाधारतायाव्याप्यत्वस्यशब्दादलाभेऽपिअर्थतस्तल्लाभात् द्विती
यायाः अत्यंतसंयोगार्थपरत्वमितिनानुशासनविरोधः नचभूतलेघटः भूतलेघटवदित्यादिप्रत्ययबलाद
तिप्रसक्तोऽपिधर्मआधेयत्वाधारत्वयोरवच्छेदकइतिवाच्यं तादृशप्रत्ययेऽवच्छेदकत्वभानानुपगमात् आ २२
धेयतायाअतिप्रसक्तधर्मावच्छेद्यत्वेसाध्यसामानाधिकरण्यावच्छेदकधर्मात्मकेव्याप्तिशरीरेपि ।। ।।

आदीनांस्वरूपसंबंधरूपावच्छेदकत्वनिवेशस्याव्यभिचारित्वनियामकाभावानत्यतिप्रसक्तमवच्छेदकमितितत्स्थलीय-
चिंतामणिफक्किकापरिष्कारविशेषेणवासंभवदुक्तिकत्वापत्तेः आधारतायाअतिप्रसक्तधर्मावच्छेद्यत्वेयद्येत्वपि
करणतावच्छेदकमितितल्लक्षणव्याप्यापत्तेस्वरूपसंबंधरूपावच्छेदकत्वप्रवेशेऽव्यभिचारित्वनियाम्याऽऽलघवपि
त्वाविरुद्धदिक्कालावच्छिन्नवृत्तिकस्येत्यादिदूषणोनेरणनन्यरिम्यर्द्दीधितिकृतामननिरिक्तवृत्तित्वरूपावच्छेदक
त्वविवक्षयाअसंगत्यापत्तेः अस्तुवाव्याप्यवृत्तिधर्मस्यातिप्रसक्तस्यापिदर्शितप्रतीतिबलादाधाराधेयभा
वावच्छेदकत्वेव्यासज्यवृत्तेस्त्वतिप्रसक्तस्यनदवच्छेदकत्वगप्रसक्तेः नेतिजलोभयंगंधवत् स्नेहगंधवत्।
स्नेहगंधोभयंनेत्यादिप्रत्ययप्रतीतेः अथवाद्वितीयार्थेऽध्ययनाधारत्वेननन्मात्रस्यादिरूपप्रकृत्यर्थविशेषण

मु॰वा॰ २३ 253

जापन्नतत्तन्मासत्वादिव्यक्तीनां व्यापकतासंबंधेन पारतंत्र्येण विशेषणत्वमुपेयते तादृशं व्यापकत्वे समानाधिकर
णव्याप्यवृत्त्यभावप्रतियोगितावच्छेदकत्वसंबंधेन स्वावच्छिन्नस्य यो भेदस्तदाश्रयधर्मवत्त्वे तादृशधर्मश्चैत्रैवाधीतत्
त्वादौ चैत्रीयाध्ययनाधारतात्वविशिष्टेव संबंधेन भावनीयम् मासाद्यंतरनिष्ठतादृशाभावप्रतियोगितावच्छेदक
त्वस्य तादृशधर्मे सत्वेपि तत्तन्मासत्वसमानाधिकरणाभावप्रतियोगितानवच्छेदकतादृशधर्मे उक्तसंबंधेन तत्तन्मा
सत्वावच्छिन्नस्य यो भेदस्तदाश्रयत्वमक्षतमेवेति यत्किंचिदेकमासादिमात्रव्यापकाध्ययनादिस्थलेपि तादृशप्र
योगनिर्वाहः प्रतिमासमधीते मासादौ प्रत्यादिशब्दानां मासादिपदोपस्थाप्यानुगतरूपावच्छिन्नमासत्वादिमन्निष्ठा-
भावप्रतियोगितावच्छेदकत्वसामान्याभावघटितव्यापकताबोधकतया यत्किंचिदेकमासादिव्यापका- २३

ध्ययनादिस्थलेनतादृशः प्रयोगः अथ अत्यंतसंयोगार्थकद्वितीयायाएकादिपदंविनापियत्किंचिदेकमासादि ।

व्यापकताबोधकत्वेउपसद्भिश्चरित्वामासमेकमग्निहोत्रंजुहोतीत्यत्रैकपदवैयर्थ्यमितिचेन्न तत्रमासाधिकका

लव्यापकत्वेपिमासव्यापकंतयाऽधिककालव्यापकस्यहोमस्यशास्त्रार्थतावारणायैकपदोपादानात्तथास

तितस्यकेवलार्थकतालाभात्तादृशप्रयोजनोपपत्तेः अतएवयावज्जीवमग्निहोत्रंजुहोतीतिश्रुतिबोधिताग्निहोत्रा

नुवादेनसतिलब्धीहित्वपदव्यसमासेकत्वपकालस्यवविधानेवाक्यभेदः स्यादितितादृशद्व्यकालोभयविशि ।

ष्टस्यगौणाग्निहोत्रपदप्रतिपाद्यस्यकर्मान्तरस्यैवविधायिकातादृशीश्रुतिरितिसिद्धांतेयावज्जीवकालांतर्गतमा

सत्वपकालांशेप्यनुवादतासंभवात्प्राप्ताग्निहोत्रानुवादेनद्व्यस्यैवविधानमुचितमितिपूर्वपक्षोपिनिर ।

मु॰वा॰ २४ स्तः यावजिवमित्यादिश्रुत्यायावज्जीवव्यापकत्वेबोधितेऽर्थतोमासैकव्यापकतालाभेपिउपसत्त्वरूपकगुणकत्व
विशिष्टहोमेतन्मात्रव्यापकतायाअलाभेननस्यापिविधेयतयावाक्यभेदस्यप्राप्ताग्निहोत्रानुवादेनद्रव्यविधिपक्षे
दुर्वारत्वात् अथतादृशश्रुतेर्द्रव्यकालोभयविशिष्टस्यगौणाग्निहोत्रप्रतिपाद्यस्यकर्मान्तरविधायकत्वेपिनकथंवा
क्यभेदः विधेयभेदस्यतावतान्यपरिहारात् प्रकृतधर्मिणोन्याधिकस्यविधानात् एवंचप्राप्तेकर्मणिनानेकोऽ
विधातुंशक्यतेगुणः अप्राप्तेतुविधीयन्तेबहवोप्येकयत्नतः इत्यपिनिर्युक्तिकमितिचेन्न यत्रविधेयांशेगुणपदने
कधर्मिणोविशेषणतयाभानंतत्रविधेयविशेषभेदेपिविशिष्टनिष्ठविधेयत्वाभेदेनवाक्यभेदविरहात् अन्यथाभूतले २४
नीलघटवदित्यादावपिवाक्यभेदप्रसंगात् अत्रवाग्न्यंशेविशेषणतयायत्रानेकेषांविधानेतत्रतेषांविधेयताभिन्नैवे

तिवाक्यभेदः यद्यपि तत्रोपसञ्चरुकरणकहोमाधिकरणतात्वेनाधिकारिविशेषकृततादृशहोमाधिकरण-
तात्वेन वा मासैकव्यापकता मासन्यूनकालहोत्रकृतहोमाधिकरणतायामपि च मासादिने पुरुषांतरकर्तृकहोमा-
धिकरणतायाः सत्वेनात्तत्तैच तत्तत्पुरुषकर्तृकतादृशहोमाधिकरणतात्वेन व्यापकतायाः श्रुतितात्पर्यविष-
यत्वे च विधेयानंतत्वं तथापि विभिन्नपुरुषकर्तृकहोमाधिकरणताद्वयावृत्तितादृशचरुहोमाधिकरणतामात्र-
वृत्तिधर्मत्वेनानुगमीकृत्य तत्तत्पुरुषकर्तृकतादृशचरुहोमाधिकरणतात्वावच्छिन्नव्यापकतानां संसर्गविषया
विवक्षितत्वान्न दोषः तादृशाधिकरणताद्वयावृत्तित्वं च वृत्तित्वस्वनिरूपकहोमकर्तृनिष्ठभेदप्रतियोगिकर्तृ-
कहोमाधिकरणतावृत्तित्वोभयसंबंधेनाधिकरणताविशिष्टान्यत्वरूपमनुगतं बोध्यं मासमधीन इत्यादौ ॥

सु॰ वा॰
२५

वपि चैत्रकर्तृकाध्ययनाधिकरणतात्वरूपव्यापकतावच्छेदकधर्मस्योक्तानुगतरूपेणैवानुगमः कार्यः अतः मासमधी
यानो दृष्ट इत्यादौ विशिष्य चैत्रत्वाद्यनुपस्थितावपि नान्वयबोधानुपपत्तिरिति बोध्यं अथ सर्वं स्वयमूहनीयं दण्डं विना न
घटः रासभं विनापि घट उत्पद्यते इत्यादौ विनापदार्थोऽभाववान् तत्पदसमभिव्याहृतद्वितीयार्थाभावान्वयि प्रतियो-
गित्वमनुयोगित्वं वार्थः नञर्थोऽभावः तथा च दण्डाभाववदुत्पत्तिकत्वाभाववान् घटः रासभाभाववदुत्पत्तिको घटः-
इति बोधः यद्यपि निपातार्थेन नामार्थस्य साक्षादपि भेदेनान्वय तथापि संभवति सार्थकत्वे विभक्तेर्निरर्थकत्वमनु
चितमिति द्वितीयाः सार्थकत्वमुपेयते भूतले न घटं चंद्र इव मुखं इत्यादौ प्रथमायाः प्रतियोगित्वाद्यर्थकत्वे प्रथ
मेवन साधुः स्यात् प्रातिपदिकार्थान्वयिनोऽन्यपदेनाभिधानस्थल एव प्रातिपदिके त्यादि सूत्रेण प्रथ ॥ २५

मायाविधानादितितत्रप्रतियोगितादिसंबंधविषयैवभाषतेउक्तेपेयत्तेदंडविनावाघटोनजायतइत्यादौचविनार्थेघ
टोत्पत्त्यायभावोन्वयेन्नयोविशेषणदंडाद्यभावस्यतदनुयोगितावच्छेदकत्वंभाषते इत्येनगन्यइत्यायप्रयोगात् उ
पलक्षणीभूतधर्मावच्छिन्नेननञर्थाभावान्वयइतिब्रुमत्तेरितिरासभंविनाघटोनजायतइतिनप्रयोगः प्रतिप्रस
क्ततयारासभाभावस्यघटोत्पत्त्यायभावानुयोगितावच्छेदकत्वविरहात् अथवाऽभावएवविनार्थः दण्डविना
नघटइत्यादौचविनातार्थस्याभावस्यनञर्थेघटाद्यभावेप्रयोज्यतासंबंधेनैवान्वयः अतएवरासभंविनानघ
टइत्यादयोनप्रयोगाः अतएवदंडाद्यभाववतिघटादेर्भावपिजायतइत्यायध्याहारंविनैवदंडंविनानघट
इत्यादिप्रयोगोपपत्तिः रासभंविनाघटइत्यादौचविनार्थस्याभावस्यसामानाधिकरण्यसंबंधेनघटादाव

मु॰वा॰ त्वयः दीधितिकृतापिउविनाभावोव्याप्तिरित्यत्रसाध्यंविनासाध्याभाववतीतिव्याख्यानेतत्रसम्बन्धंतेनमनुपासंसर्ग
२९ विषयाभासमानेनतदधिकरणनिष्ठत्वमेवोपात्तंनत्वविनापदार्थत्वेनाधिकरणं अभावाधिकरणपर्यन्तस्यवि
नापदार्थत्वेपिसम्बन्धाधेयत्वरूपापदार्थविवरणरूपतायाआवश्यकत्वात् नचविनापदोत्तरलुप्तसप्तम्यर्थ
एवाभाववतीतिसम्बन्धाविछिन्नइतिवाच्यम् निपातोत्तरविभक्तेर्निरर्थकत्वात् अतएवदर्शितनिपातोत्तरसा
धुतार्थाप्रथमैवेतिशाब्दिकाः पृथिव्यामेवगंधइत्यादावेवकारप्रकृतिकसम्बन्धापदाधेयतावोधकत्वमंगी।
कृतंशिरोमणिनातत्रापितस्यननिर्भरः अलभ्यात्तत्रप्रतियोगितयापृथिव्यन्यवृत्तित्वभानानुरोधेनैवकारस्यासमभि
त्वार्थकत्वंगौरवाउभपेक्षसम्राधेयत्ववाचकत्वेनलुप्तायाः सप्तम्याः कल्पनंप्रकृतेवाधेयत्वस्यसंसर्गतयैवोपपत्तौविनापदस्याका २९ नाथे

धेयतार्थकसप्तमीकल्पनंक्वकल्पनमेवएवकारस्यलेचाभावत्वपएवार्थेअन्यत्वपतदर्थस्यत्वाधेयतासंबंधत्वग-
तिनसंभवति आधेयताद्देशत्वस्यैवसंबंधत्वात् नचतदभावेनचतत्राधेयत्वाभावोनप्रतीयते अपितत्राधेयतासं-
बंधावच्छिन्नप्रतियोगिताकपृथिव्यायत्वाभावश्चत्वपेयेंताष्टशप्रतियोगिताकत्वमेवऽभावेऽन्यस्यसंबंधोस्त्विति वा-
च्यं आधेयतासंबंधस्यप्रतियोगिनआधारस्यानुयोगित्वाभावेष्टत्वनियामकत्वेनाभावप्रतियोगितानवच्छेदक-
त्वात् चैत्रः पचतीत्यादौक्रमादिसंबंधस्यापदार्थत्वेपिपाककृतियानित्यादौत्ववादिपदेनविवरणात् उक्तस्य
लेसामानाधिकरण्यस्यपदेनविवरणमपिनविरोधमासादयति विवरणीयार्थस्याप्यन्यलभ्यत्वेऽपदार्थ-
तोपपत्तेरित्यलमसदावेशेन विनावातेऽहंतः पतितत्वादौविनापदार्थस्याश्रयतासंबंधेनहंतत्वेनान्वयाद्धा

ताभावविशिष्टोत्पत्तः पतितइतिशाब्दतोलभ्यते पतनेनुभवसिद्धोवातजन्यत्वाभावलाभस्त्वार्थः जन्यतायाः पदानु-
मु.वा. पस्थितत्वात्तदभावस्यतस्याहृत्यनियामकसंबंधतयातदवच्छिन्नवाताभावस्यशब्देनबोधयितुमशक्यत्वात् एवं
२७ विनागतइत्यादौपुत्रादिपदंलक्षणयापुत्रगमनादिपरंविनापदंबोध्यतदभावसमानकालीनत्वादिसंबंधेनगमनेनेति स-
मानकालीनत्वघटकंकालनिष्ठंस्वाधिकरणत्वमनवच्छिन्नंबोध्यमतोगमनादिकालेतदनधिकरणदेशावच्छे-
देनगमनाद्यभावसत्वेपिनातिप्रसंगः केचित्तुउक्तस्थलेऽसाहित्यमेवविनापदार्थः तस्यगमनादिक-
र्त्रन्वयः असाहित्यंचस्वकर्तृकसमभिव्याहृतगमनादिक्रियासमानकालीनतादृशक्रियाकर्तृत्व- २८
रूपसाहित्याभावः क्रियान्वयीस्वकर्तृकतादृशक्रियाकालीनत्वाभावएववाविनार्थः कर्तृत्वेचपुत्रादेराधे

यत्संबंधेनान्वयः विभक्तिः साधुत्वार्थिकैव: अस्तुवाआधेयत्वंद्वितीयायाःपदार्थः सप्तम्या आधेयतार्थकत्वेपिनात्र
सप्तमीप्रसक्तिः तस्याः कारकविभक्तित्वेनक्रियान्वयिस्वार्थबोधकत्वात् अतः शेषषष्ठीप्रसक्त्यातामेवोपपदविभ
क्तिर्द्वितीयाबाधतइति सर्वाह्युपपदविभक्तयः षष्ठ्यपवादिकाइत्यस्याविरोधइति विनासमानार्थकयोरंतरांतरेण
तिनिपातयोरपिदर्शितैवरीतिः एवंविनायुक्तत्तृतीयापंचमीस्थलेपिमर्यादाभिविध्यर्थकयावच्छब्दयोगेपिद्वि
तीयादृश्यते तत्रमर्यादार्थकोयावच्छब्दः आरभ्यतस्यांदशमींयावत्प्रपूजयेत्सर्वंतुराजपुत्रीमित्यादौमर्या
दासीमाकालत्रयादेशत्रयाच कालनिष्ठत्वेचतत्कालनिष्ठसमभिव्याहृतकालभावानधिकरणत्वप्रागभावाधि
करणसजातीययावत्कालवृत्तिसमभिव्याहृतक्रियानधिकरणत्वं एवंचोक्तस्थलेयावच्छब्देनदृजात्यपक्रियायाः ।

सु॰वा॰ शुक्लदशमीनिष्ठतादृशसीमात्वनिरूपकत्वं प्रत्याय्यते तावतैवार्थतः शुक्लदशम्या मर्यादात्वं लभ्यते तन्निष्ठसीमात्व
२८ निरूपकत्वं च तदहर्निवेसति कृत्स्नवमीप्रागभावानधिकरणतत्प्रागभावाधिकरणतिथिकूटव्यापकत्वं तावता षो
२८ डशानिष्ठ्याधिकरणकषोडशपूजारूपस्यैककर्मणो विधेयतया लाभप्राप्यकालः समुदाये सजातीयत्वविशेषणात् ।
पूजाया उक्तविशेषणद्वयाक्रान्तदण्डादिसमुदायाव्यापकत्वेपि न बाधः अन्वयितावच्छेदकरूपेण साजात्यस्य विवक्षणा
दुक्तस्थले च तिथिमित्यस्याध्याहारेण दशमीपदार्थतावच्छेदकस्य तिथित्वघटितत्वेन वा यावत्पदार्थान्वयितावच्छेदकत
या तिथित्वभानात् तेन रूपेण दण्डादेर्दशमीसजातीयत्वाभावात् तिथिश्चाखण्डकालविशेषरूपा न तत्वं दण्डमण्ड २८
लकालारंभायत्तगुणक्रियाप्रचयरूपः पूजायास्तावत् क्रियाहर्निवासंभवात् अत्र च प्रागभावप्रचया ॥

वत्पदार्थः द्वितीयार्थः प्रतियोगित्वमनुयोगित्वं वा तच्च तत्त्वकृत्यर्थदशम्याश्चान्वयः तावता च दशमीप्रतियोगिकप्रागभा
वलाभः तस्य च स्वप्रतियोगिप्रवृत्तित्वविशिष्टव्यापकतासंबंधेन कृज्ज्ञानोपसमभिव्याहृतक्रियायामन्वयः व्यापकत्वं च।
स्वाधिकरणतिथिनिष्ठाभावप्रतियोगितानवच्छेदककृज्ज्ञाविशेषणवत्त्वं स्वाधिकरणत्वं च स्वाधिकरणकृत्स्ननवमीप्रा
गभावावच्छिन्नभेदविशिष्टकालिकविशेषणतासंबंधेन एतेन कृत्स्ननवमीप्रागभाववत्प्रतियोगिकभेदस्याव्यावर्तक
तया नद्वत्स्यामावस्यभेदनिवेशो भावि कृत्स्ननवमीप्रागभावाधिकरणत्वमादाय नाप्रसिद्धिः तथा सत्यपि तत्तद्दश
मीप्रागभावाधिकरणकालस्य स्वाधिकरणकृत्स्ननवमीप्रागभावावच्छिन्नभेदवत्त्वसंबंधेन तत्तत्प्रागभावाधिक
रणत्वात्ततः नचैवमपि व्यवहितकृत्स्ननवमीप्रागभावावच्छिन्नभेदघटितसंबंधेनाव्यवहितपूर्वकृत्स्नन।

मु॰वा॰ वमीपूर्वतिथीनामपितन्नदशमीप्रागभाववत्त्वात्तदधिकरणतिथिव्यापकत्वंपूर्णायांनसंभवतीतिवाच्यं स्वावच्छिन्नकुस
२९ नवमीप्रागभावाधिकरणत्वसंबंधेनस्वावच्छिन्नभेदस्यैवप्रागभावसंबंधेनिवेशनीयत्वात्स्वाधिकरणनिष्ठाभावप्रतियो-
गितावच्छेदकत्वमपितादृशावच्छेदकत्वमपिसंबंधेनस्वावच्छिन्नस्यभेदः अतस्तादृशावच्छेदकत्वत्वावच्छिन्नाभावनिवे-
शेयत्किंचिद्दशमीप्रागभावाधिकरणनिष्ठाभावप्रतियोगितामादायाप्रसिद्धिवारणायविशिष्यतत्तत्प्रागभावत्व-
पत्स्वपदार्थस्यापिसंबंधमध्येप्रवेशमतयाऽननुगमइतिनिरस्तम्देशात्तूपासीमाचकाशीतः कौशिकींयावदायाती
त्यादौतत्रकौशिक्यागमनसीमात्वंप्रत्याय्यते तच्चकाशीपूर्वकौशिकीपश्चिमदेशव्यापकगमनानधिकरण
त्वंयावत्पदेनचकौशिक्यनधिकरणकत्वेसतिकाशीपूर्वकौशिकीपश्चि (तच्चकाशीपूर्वकौशिकीपश्चिमदेश)। २९

मदेशव्यापकत्वंगमनेप्रत्याय्यते तत्रद्वितीयार्थोऽवधित्वमवधिमत्त्वंवाप्रतीचीत्वावधित्वनिष्कर्षः पूर्ववत्तस्या
यमूहनीयः अभिविध्यर्थोयावच्छब्दः कार्त्तिकामारभ्यचैत्रयावच्छीतंभवतिकाशीतः पाटलीपुत्रंयावद्दृष्टोदेवइ
त्यादौअभिविधिलक्षणमर्यादाभिव्याप्तिः एवंचप्रथमेकार्त्तिकपूर्वकालोत्तरचैत्रोत्तरकालपूर्वकालव्यापकत्वंचैत्रो
त्तरकालावृत्तित्वसहितंशीतभवनेद्वितीयेचकाशीपश्चिमदेशपूर्वपाटलिपुत्रपूर्वदेशपश्चिमव्यापकत्वेपाट
लिपुत्रपूर्वदेशावृत्तित्वसहितेदृष्टोयावच्छब्देनप्रत्याय्यते विशेषःपूर्ववत् यावच्छब्दसमानार्थकाङ्शब्दस्थलेपिद
र्शितैवरीतिरवसेयानयोगेचपंचमीसाधुः यत्तमनुप्रावर्षदित्यादौअनुशब्दार्थः कारकत्वरूपंरेतत्वं अनुर्लक्षणइत्यत्रा
कर्मप्रवचनीयसंज्ञाविधायकसूत्रेलक्षणपरस्यकारकरेतत्परत्वात् (अत्रकर्मप्रवचनीयेद्वितीयेत्यनुशासनोत्तराद्वितीयावोध्या)

सु·वा·
३०
30

तत्र च यत्तान्वितस्याधेयत्वरूपद्वितीयार्थस्यान्वयः हेतुतायाश्च निरूपकत्वसंबंधेन तु हीनेऽत्यनुशासने हीनपदस्यापकृष्ट
परत्वादित्याशयः वन्वयः अपत्वं वानुशब्दार्थः तत्र निरूपितत्वरूपद्वितीयार्थस्य यत्तान्वितस्यान्वयः जन्यतायाश्चाश्रय
त्वसंबंधेन तृतीये अन्वर्जुनं योद्धारऽइत्यत्रापकर्षरूपं हीनत्वमनुशब्दार्थः अर्जुनावधिकत्वं द्वितीयार्थः अवधित्वस्या
पादानतारूपत्वेपि क्रियान्वयाभावान्न पंचमीप्रसक्तिः अस्मादयं दीर्घऽइत्यादौ भवतीत्यस्याप्याहारेणैव पंचम्युपपादना
दतः षष्ठ्यपवादतानिर्वाहः वृक्षं प्रति विद्योतते विद्युत् मातरं प्रति साधुः यो मां प्रति स्यात् वृक्षं वृक्षं प्रति सिंचतीत्या
दौ लक्षणेत्थंभूतेत्यादिसूत्रानुशिष्टकर्मप्रवचनीयसंज्ञकः प्रत्यादिशब्दः प्रथमे परिचायकत्वरूपं लक्षणत्वं प ३०
रिचेयत्वरूपं लक्षणत्वं वा तदर्थः वृक्षप्रकाशेन विद्युद्द्योतज्ञानाद्वृक्षस्य परि ॥ ॥ ॥

चायकताद्वितीयार्थश्चाधेयत्वं निरूपितत्वं वा द्वितीये साधुत्वं प्रियकारित्वं साधुत्वघटकप्रियान्वयी संबंधः
कर्मप्रवचनीयार्थः संबंधान्वयिप्रतियोगित्वं तन्निरूपकत्वं वा द्वितीयार्थः तृतीये भागः स्वत्वाश्रयः प्रत्ययार्थः
तदन्वयी संबंधो द्वितीयार्थः इत्थं वास्मत्संबंधी यो भागः स्यादिति बोधः चतुर्थे कर्मण्येवाद्वितीयाषत्वबाधपव
व्याप्नवंते
संज्ञाप्रयोजनं प्रतिश्च निरर्थकः गृहे गृहे ऽश्वाः इत्यादाविव व्यापकताया द्विरुक्तिबललभ्यत्वात् प्रतिशब्दस्य व्याप
कतार्थकत्वे उक्तार्थकतया गृहे ऽश्वा इत्यादाविव द्विरुक्तिरेव न स्यात् न च प्रतिशब्दस्यापि व्यापकतार्थकत्वे प्रतिदि
नमधीते इत्यादौ लक्षणेत्थं वृत्तं वृत्तं सिंचतीत्यादौ द्विरुक्तेरपि प्रसक्ते संभेदे नान्यतरवैयर्थ्यमिति न्यायात् द्व।
योरेव व्यापकताबोधकत्वमवर्जनीयमिति वाच्यं प्रतिमासमित्यादावव्ययीभावे प्रथमातिरिक्तविभ

मु॰वा॰
३१
31

क्तेः साधुत्वेन प्रतिशब्देन मासान्वितव्यापकत्वं क्रियायां बोध्यते विभक्तिः साधुत्वार्थो हि तं हि तं सिञ्चतीत्यत्र सेके द्वि-
तीयार्थकर्मत्वावरुद्धप्रकृत्यर्थविशेषितव्यापकताबोधयितुं न शक्यते एकविशेषणत्वेनोपस्थितस्यान्यत्र वि-
शेषणत्वे व्युत्पत्तिविरोधात् कर्मत्वसंबंधस्यैव व्यापकताघटकत्वेन स्वीकरणीयतया हि तत्त्वनियामकतया
तस्य तथात्वासंभवाच्च न च स्यसेककर्मत्वे आश्रयतासंबंधघटितव्यापकताप्रत्यायनमपि न युज्यते प्रकृत्यर्थ-
योरंतरा नञर्थातिरिक्तभानस्य व्युत्पत्तिविरुद्धत्वात् नामूकस्येनरोत्पत्तेः नानुपमर्द्यमाउर्भावादित्या-
दौ नञर्थमात्रस्य पंचम्यर्थहेतुतायां विशेषणत्वेन प्रकृत्यर्थस्य च विशेष्यत्वेनान्वयात् तस्मात्प्रतीतिर्निरर्थका ३१
एव

हिरुक्त्यन्वयतात्पर्यबलाच्च सेचनकर्मत्वे वृक्षादेर्व्यापकत्वं संसर्गतयैव भासते यदि च वृक्षं प्रति षिंचतीत्या
दावुपसर्गस्य प्रकृतेर्वाच्यो द्योतो वा कश्चिदन्योऽर्थस्तदाऽस्तु स एवात्रापि तदर्थः अत एव तस्यैवास्यापि प्रतिश
ब्दस्य प्रयोगो नानर्थकः वस्तुतोनर्थकयोः कर्मप्रवचनीयाधिपरिशब्दयोः प्रयोगवत्तादृशा प्रतेरपि प्रयोग
स्य प्रयोजनांतरानुपपत्तिश्चिंत्या अतेर्यत्र व्यापकतार्थकत्वं तत्र प्रतिवृक्षं सिंचतीत्यव्ययीभावसमास एव नियतः
तदर्थकाव्ययस्याव्ययीभावसमासविधेर्विभाषाधिकारीयतया विरहेण नित्यत्वात् अतो वीप्सया प्रतिवृक्षं सिंचती
तिवत् वृक्षं प्रतिसिंचतीति न प्रयोगः यत्र व्यापकत्वार्थकेनाव्ययेनाव्ययीभावसमासस्तदन्तरं सर्वत्र प्रथमावि
भक्तिरेव नतूपकुंभे गच्छतीतिवत् प्रतिगृहेऽवा इत्यादिरपि प्रयोगाः उक्तप्रक्यानत्र प्रतिनाऽश्वादेर्गृहादिव्या

मु॰ वा॰ पकतायाबोधयितुमशक्यत्वात् तदाधारत्वादिरूपसंसर्गस्यापर्यै च समासार्थस्य गृहादिव्यापकत्वस्याश्रयता।
३२ संबंधेन तदर्थस्य व्यापकत्वरूपधर्मिणो वाऽभेदेनान्वये मेयत्वे घटः घटह्नौ घट इत्यादिप्रयोगवारणाय क
32 ल्यायाः सप्तम्यर्थाधारतया आश्रयत्वादिसंबंधेन प्रकृत्यर्थानन्वयमुत्पत्तेविरोधात् उपक्रमे निधे
ह्रि उपक्रमोदागत उपक्रमेन कृते इत्यादौ चाविवक्षितस्याधारत्वापादनत्वकारणत्वकर्तृत्वादौ क्रमसमीपा
देराधेयतासंबंधेनान्वयस्य व्याधेयत्वादौ निरूपितत्वसंबंधेन तदन्वयस्यवाबाधेन कथमिद्युत्पत्तिविरोध
इति उपपद्यते एव तथा प्रयोगा इति ध्येयं त्वां च माचांतरे इत्यादौ चांतरायुक्ते द्वितीयाया निरूपितत्वमर्थः। ३२
तस्यांतरापदार्थतावच्छेदकमध्यत्वेनान्वयः एवमन्यत्रापि तदर्थस्तु तदिशास्वयं परिच्छेद्यः कारकविभक्ति

तृपत्ततीयायाः क्रियान्वयिकर्तृत्वंकरणत्वंचार्थः कर्तृकरणयोस्तृतीयेत्यनुशासनात् कर्तृत्वंचमुख्यंक्रियानुकू
लकृतिरेवसाचाकर्त्राख्यातसमभिव्याहृतेचैत्रः पचतीत्यादौक्रियाविशेष्यतयाख्यातेनप्रत्याय्यतेचैत्रेणपच्यतेशा।
प्यतइत्यादिकर्मभावाख्यातस्थलेचक्रियायांविशेषणतयातृतीययाप्रत्याय्यते यत्र तत्राख्यातार्थएवकृतिः तृ
तीयार्थस्याधेयत्वं तस्यचाख्यातार्थकृतिविशेषणतयान्वयः कृतेश्चक्रियाविशेषणतयातथाकृतिबोधने।
चात्मनेपदरूपस्याख्यातस्ययागादिसमभिव्याहारस्थानमपेक्षितं पचतिपचतेइत्यादौतथाकृतस्याबोधात् चैत्रे
णज्ञायतेगम्यतइत्यादौतृतीयायाश्चाधेयतार्थकत्वंक्लृप्तमेवेतिनतत्कल्पनमधिकमिति तत्रचैत्रेणपक्वमित्यादौतृ
तीयायाः कृत्यर्थकताश्चावश्यकीतत्रकृत्यर्थकाख्यातविरहात् कृतश्चकर्तृकर्मवाचकत्वेनकृत्यर्थकताविरहा।

खु॰वा॰ त् यदि च कर्तृकृतः कृतावेव शक्तिर्न तु विशिष्टे ज्ञाताइत्यादौ आश्रयार्थकतायाः कृतः कृत्प्रत्ययात्तत्र कृ
३२ तत्वयादेव कर्तृलाभसंभवादित्युच्यते तथापि कर्मकृतः कृत्यर्थकत्वमप्रसक्तमेव कृत्प्रत्ययस्य कचित्कर्तृ
बोधकत्वेपि चैत्रेण पाच्यः चैत्रेणाउप्यच ओदनः चैत्रेणौदनस्य पाक इत्यादौ कृतौ न कृतिबोधकत्वमिति त
त्र कृतिबोधानुरोधेन तृतीयायाः कृतिवाचकत्वमावश्यकमेव एवं च चैत्रेण पच्यत इत्यादावपि
तृतीययैव कृतिर्बोध्यते तत्र चैत्रादेः संबंध एवाधेयत्वमित्यत एव निर्वाहे कृतावाधेयत्वस्य विशेषण
तयाभानोपगमस्यानुचितत्वात् तथा सति तत्संसर्गस्यापि विषयताकल्पनाधिक्यात् तादृशवाक्य ३२
ज्ञानघटितशाब्दसामग्र्यामधिकेकोपस्थितिनिवेशेन च गौरवात् अथ तत्र कृतेस्तृतीयार्थ ॥

तोपगमे चैत्रेण पच्यते न मैत्रेणेत्यादौ तत्तदीयांतार्थमैत्रीयकृतेरभावः पाकेऽन्वेतीत्युपेयं तस्याश्च समवायसंबंधावच्छि
न्नाभावो मैत्रकर्तृकपाकेपीत्यतिप्रसंगः जन्यतायाश्च वृत्त्यनियामकतया तत्संबंधावच्छिन्नाभावः प्रसिध्यत्येव न
मैत्रकर्तृकपाककर्मत्वाभावस्य कर्मणि तंडुलादौ प्रतीतिश्च कर्मवाचकपदासमभिव्याहारस्थले दुर्वचेदा आधेयत्व
स्य तत्तदीयार्थत्वे वाधेयत्वस्याभावबोधप्यवकृतानुपेयते न च तथा सति चैत्रमैत्रोभयकर्तृकपाकस्थले चैत्रीयपाक
कृतौ मैत्रवृत्तित्वाभावसत्त्वात् मैत्रेण न पच्यत इति प्रयोगापत्तिरिति वाच्यं मैत्रेण न पच्यत इत्यतो वर्तमानपाका
नुकूलकृतित्वावच्छेदेन मैत्रवृत्तित्वाभावबोधनादुक्तस्थले च तादृशकृतित्वसामानाधिकरण्येन मैत्रवृत्तित्वसत्त्वात्ता
दृशवाक्याप्रामाण्यात् वर्तमानत्वस्य कृतिविशेषणतया चैत्रेण पक्ष्यते पच्यते च न तु पच्यत इत्युपपद्यते कि

सु·वा· याविशेषस्तत्थात्वाद्यदामैत्रेणस्यक्रियतेनतत्पच्यतेतदामैत्रेणानपच्यतइतिप्रयोगस्य नचाख्यातेनकालस्य
३४ कृतिविशेषणतयाबोधनात् कालविशेषितकृतित्वस्यान्वयितावच्छेदकतयातदवच्छेदेनतन्नाऽभावःशक्य
तेबोधयितुंनतुकालक्रियोभयविशेषितकृतित्वावच्छेदेनकर्मप्रत्ययस्थलेक्रियायाःकृतिविशेषणत्वाभावेन
34 तद्घटितधर्मस्यान्वयितावच्छेदकत्वाभावादितिवाच्यं क्रियाविशेषघटितधर्मस्यान्वयितानवच्छेदकत्वेपि
तदवच्छिन्नत्वविशिष्टविशेषणतायाअभावसंसर्गतयाभानसंभवेनसामंजस्यात् नचान्वयिताव
च्छेदकावच्छिन्नत्वमेवविशेषणसंबंधेभासतइतिनियमः तथासतिपारदिपच्यतिसमवदाइत्या ३४
दौसमवदप्रष्ठोत्पत्तित्वादेः शरद्वृत्तित्वाद्यन्वयिता ॥ ॥ ॥

मवच्छेदकतयाऽऽख्यातार्थप्रतिपाद्यतावच्छेदकपुष्पोत्पत्तित्वाद्यवच्छेदेन शारदवृत्तित्वाद्यन्वये बाधादवच्छेदकावच्छेदेना-
न्वयानुपपत्तेः रत्वयितावच्छेदकसामानाधिकरण्यमात्रेण च तदन्वयोपगमे शरदि पुष्प्यन्ति सप्तच्छदाः शरदि पु-
ष्प्यन्ति पंचकाद्यन्यविशेषणप्रयोगापत्तेः यदि च तत्र शारत्संबंधः सप्तच्छदविशेषणतया भासते तेन पुराख्यातार्थे।
धात्वमात्रार्थैवापुष्पोत्पत्तौ अत एव तत्र कारकविभक्तिरूपसप्तम्या अनुपपत्त्या कालरूपविशेषणपदोत्तरं सा।
नेयेण सप्तमी शार्ववर्मणानुशिष्यपवं च क्रियानिमित्तत्वरूपकारकत्वगर्भकर्तृत्वस्याख्यातार्थत्वे पुष्पोत्पत्ते।
निमित्तत्वरूपाख्यातार्थस्य विशिष्टान्वयानुरोधेन शारत्संबंधेऽप्यन्वय उपगन्तव्यः कारकत्वस्याख्याताद्या।
र्थत्वानुपगमेऽपि शीतलं सरोवगाहते निदाघडः स्वंब्रयैतीत्यादाविवोद्देश्यविधेयभावमहिषोद्देश्यविशे

मु॰वा॰ षणधारत्संबंधेविधेयभक्तपृष्योत्पत्तोः   प्रयोज्यप्रयोजकभावस्यसंबंधमर्यादयाभानमौत्सर्गिकमितिचेंपका
३५ दिपृष्योत्पत्तौधारत्संबंधनिमित्तकत्वाभावान्नोक्तातिप्रसंगइत्यस्यलेऽवच्छेदकावच्छेदेनान्वयाभानमौत्सर्गिक
35 पिवनैपियत्नेऽभ्युपेयते तथापिदर्शिततनियमोनप्रामाणिकः नचतादृशनियमाभावेऽन्दमवनेमैचैत्रेणवपत्तनेते
मनमित्यत्रैनवनाधिकरणकत्वेमनपाकत्वेनरूपेणशब्दात्माकानुपस्थितमानदवच्छिन्नेमैत्रात्मसमवेतभवि
ष्यत्कृतिविषयत्वस्यावच्छेदबोधासंभवकथनंदीधितिकृतोविरुध्येतेतिवाच्यम्   अवच्छेदकावच्छेदेनवि
शिष्टबुद्धौधर्मिणिविशेषणतयाभासमानमेवरूपंविशेषणेवच्छिन्नत्वसंबंधेनविशेषणमिन्ना ३५
न्वयेनतेषांतदभिधानात्   विशेषणसंबंधेनतदवच्छिन्नत्वमेव ॥ ॥ ॥

तदवच्छेदेनविशिष्टबुद्धौभासतेऽस्त्वपगमेशाब्दानुपस्थितत्वरूपावच्छेदेनविशेषणान्वयेबाधकाभावात् नचावच्छे।
दकावच्छिन्नत्वस्यावच्छेदकावच्छेदेनबुद्धौविशेषणांशेभानमसंभवइतिकिंपटोद्रव्यमित्यादौघटत्वाद्यवच्छेदेनद्रव्य
त्वादिमत्त्वबुद्धौद्रव्यत्वादिविशेषणस्यस्वरूपतएवभानादितिवाच्यं तादृशशाब्दबोधेद्रव्यत्वाद्यवच्छिन्नस्यैवाभे
दसंबंधेनविशेषणत्वात् घटत्वादिविशिष्टेद्रव्यत्वादिविशेषणकतादृशप्रमत्वेऽवच्छेदकावच्छिन्नत्वभानानुपप
गमेस्तत्तिविरहात् तथाचचैत्रेणनपच्यतइत्यादौपाकादिकृतित्वस्यान्वयितानवच्छेदकत्वेप्यर्थलभ्यतादृशधर्माव
च्छिन्नत्वस्यसंसर्गांशेभानंनिराबाधमेवेतिचेत् चैत्रेणनपक्वमित्यादौकृतौचैत्रादिवृत्तित्वाभावबोधासंभवेनकृतिज
न्यत्वस्यतृतीयार्थतांस्वीकृत्यक्रियायांचैत्रादिकृतिजन्यत्वाभावबोधस्यावश्यकत्वमुपगंतव्यतयाचैत्रेणनपच्यतेइत्यादावपि।

कु·वा·
३८
36

तत्रतद्बोधोपगमेनसामंजस्यात् नचपदार्थैत्रः सुप्तस्तदाचैत्रेणापक्षतेनतन्नपच्यत इतिप्रयोगानुपपत्तिः चैत्रवृ
त्तिवर्तमानकृतेरप्रसिध्यातादृशाकृतिजन्यत्वाभावप्रत्यायनासंभवाद्वर्तमानत्वाविशेषिततदीयकृतिजन्य
त्वाभावस्यचबाधितत्वादितिवाच्यं प्राख्यातार्थवर्तमानत्वादेर्नञसमभिव्याहारस्थलेऽभावांशेपवान्वयस्यव्युत्पन्न
त्वात् प्रसमध्याविनष्टघटंनपश्यतित्यादौतादृशघटकर्मकवर्तमानदर्शनाद्यप्रसिध्याऽन्वयबोधानुपपत्तेः प्र
कृतेचवर्तमानमैत्रीयकृत्यप्रसिद्धावपिप्रवर्तमानकालावच्छिन्नजन्यत्वाभावस्यैवपाकेप्रतीत्यासामंजस्यात् पा
कत्वाद्यवच्छेदेनेवमैत्रादिकर्तृकत्वाभावबोधोपगमान्मैत्रादिकर्तृकपाकादिदशायांत्र्यकर्तृकपाकेमैत्रादिक
र्तृकत्वाभावसत्वेपिनपच्यतेमैत्रेणेत्यादयोनप्रयोगाः यत्रमैत्रेणौदनःपच्यतेनतत्तेमनंनतत्रमैत्रेणनपच्यतेतेमनमि ३६ त्यादिप्रयोगाति

र्वोद्धापत्तेर्मनपाकत्वावच्छेदेनैवाभावान्वयउपगम्यते नतुशुद्धपाकत्वावच्छेदेनबाधितत्वात् यथा च तेनरू-
पेणशब्दादनुपस्थितावपितदवच्छेदेनान्वयबोधनिर्वाहस्तथोपपादितमाधेयत्वस्यतृतीयार्थत्ववादिनैवघटेन
नपच्यते इत्यादयः प्रयोगा आकाशंनपश्यतीत्यादिप्रयोगसमानयोगक्षेमा एवमंतव्याः अचेतनस्यस्वकाष्ठस्था-
ल्यादेरपिकर्तृत्वविवक्षयाकाष्ठंपचतिस्थालीपचतीत्यादिवत् काष्ठेनपच्यतेस्थाल्यापच्यते इतिप्रयोगानत्वव्या-
पाररूपेकर्तृत्वेतज्जन्यत्वरूपेसकर्तृकत्वेवातृतीयायालक्षणा एवं चैत्रेणज्ञायते इष्यते गम्यते इत्यादौ आश्रयत्व-
रूपेकर्तृत्वे आधेयत्वरूपेकर्तृमत्त्वेवानइष्यते घटेनेत्यादौ प्रतियोगित्वरूपेकर्तृत्वेऽनुयोगित्वरूपेकर्तृमत्त्वे-
वालक्षणा कर्तृपदमपिव्यापारादिमत्यचेतनादौभाक्तमेव अचेतनादौस्वरसतः कर्तृपदाप्रयोगात् अतएव

सु·वा· चकृधातोर्यत्नवाचकत्वे नचयत्नवतएवकर्तृपदार्थकर्तृकरणयोरित्यादौकर्तृपदस्यमुख्यार्थत्यागेयुक्तिविरहात्
३७ अचेतननकाष्ठादिवाचकपदयोगेकर्तृप्रत्ययानुपपत्तिरितिवाच्यं तत्रस्यकर्तृपदस्यस्वतंत्रःकर्त्तेतिसूत्रकृत्परिभाषि
तकर्तृपरत्वात् अन्यथातत्प्रणयनवैयर्थ्यप्रसंगात् स्वतंत्रत्वंचकारकांतरानधीनत्वेसतिकारकत्वंपुरुषव्यापारा
धीनक्रियानुकूलव्यापारवत्तामेवकाष्ठादीनामन्यव्यापारानधीनक्रियानुकूलव्यापारवत्त्वलक्षणस्वातंत्र्यस्यकाष्ठंप
चतीत्यादौविवक्षयाकाष्ठादेःकर्तृत्वे नचस्वातंत्र्यविवक्षणेपिस्वातंत्र्यस्यवास्तविकस्याभावात्तद्बोधकविभक्तीना
मप्रामाण्यंदुर्वारमितिवाच्यं समभिव्याहृततत्क्रियाकारकांतरव्यापारानधीनतत्क्रियानुकूलव्यापारस्यैवतत्क्रि २८
यावाचकपदसमभिव्याहृतविभक्त्यर्थत्वात् अनधीनांतविशेषणप्रयोजनंतुचैत्रःकाष्ठैःस्थाल्यांपचतीत्या ।।

दिस्थले चैत्रकाष्ठस्थाल्यः पचंतीत्यादिप्रयोगापत्तिवारणं यत्र चैत्रः पचति काष्ठं पचतीत्यादौ समभिव्याहृतका
रकांतराप्रसिद्धिस्तत्रानधीनांतविशेषणं न प्रतीयत एव तन्निर्वाहकस्थलकारादेः स्वतंत्रशब्दांतरकल्पनात् विशिष्टप्रा
प्तितो विशेषणांशाविषयकबोधानुदयात् न चैवं चैत्रो मैत्रेण पाचयतीत्यादौ हेतुकर्तृप्रत्ययस्थले कर्त्तरितृतीयानुपपत्तिः
कर्तृव्यापारस्य समभिव्याहृतहेतुव्यापाराधीनत्वादिति वाच्यं तत्र ण्यंतप्रतिपाद्यपाचनादिक्रियायामेव हेतोः का
रकतया स्वतंत्रकर्तृव्यापारस्य पच्यादिक्रियाकारकव्यापारानधीनत्वात् स्वतंत्रं प्रयुंजानस्य प्रैषो व्यापारस्तंडुलक्र
यणादिवत् पाकादावन्यथासिद्धतया न कारणमिति पाकादिप्रयोजकव्यापारवत्वेपि तस्य क्रियाकारक
त्वविरहात् यतः कारणत्वगर्भमेव कारकत्वं न तु परंपरासाधारणप्रयोजकत्वं परंपरासाधारणप्रयो॥

सु॰वा॰ १८ गर्भेम् अतएव चैत्रेण मैत्रः पाचयतीत्यत्र मैत्रः पचतीति न प्रयोगः नच पंचभिर्हलैः कर्षति गृहीत्यत्र भूविलेखा-
नानुपहृष्यादिक्रियायां स्वतंत्रकर्तृत्वम् इति भुजः प्रयुंजानस्य पुंसो गृहहिरण्यो व्यापारस्य दर्शितयुक्त्या लकारादिनाऽ
भिधानासंभव इति कर्षतीति न स्यात् कर्षयतीत्येव वक्तव्यमिति वाच्यं तत्र कृषेः प्रतिविधार्थत्वात् उक्तं च याज-
कायजंतीति यजिर्हविः प्रक्षेपार्थः पंचभिर्हलैः कर्षतीति कृषिः प्रतिविधानार्थ इति यजेर्देवतोद्देशपद्रव्यत्या-
गात्मके व्यापारविशेषरूपार्थे मुख्यत्वतया तत्र च यजमानस्यैव कर्तृत्वं तया हविः प्रक्षेपरूपफलस्यार्थपरत्वं दर्शि।
तेन तत्र चर्त्विजामेव स्वातंत्र्यं होतेत्यत्रापि हविः प्रक्षेप एव हुधातोरर्थः नतु तादृशफलावच्छिन्नसं- १८
गः तथा सति ऋत्विजस्तत्र स्वतंत्रकर्तृताविरहेण होतृपदेन प्रतिपादनासंभवात् धात्वर्थतावच्छेदकफलकर्तृ

त्वमेव कर्तृप्रत्ययेन बोध्यत इति चालितजिह्वोत्थव्यवहारो न पश्यति अतः प्रतिग्रहीतृव्यापारेण स्वत्वजनकस्तथा स।
ति तत्र दातृव्यवहारापत्तेरिति तज्जीस्वतवादिनः अथ चैत्रेण मैत्रेण पाच्यते इत्यादौ स्वतंत्रव्यापारस्य हेतुकर्तृव्या।
पाराधीनत्वेऽपि दर्शितरीत्या तस्य स्वतंत्रकर्तृत्वनिर्वाहस्तथापि तद्वाचकपदोत्तरं कर्तृकरणयोस्तृतीयेत्यनेन न
तृतीयानुपपत्तिः कर्तृत्वस्य णिच्प्रत्ययेनाभिधानात् तादृशस्वतन्त्रस्य चानभिहिताधिकारीयत्वात् इति चेन्न।
स्वकर्तृत्वनिर्वाहकत्वसंबंधेन पाकाद्यन्वयिनो हेतुकर्तृव्यापारस्य णिजर्थत्वेन स्वतंत्रकर्तृत्वस्य णिचानभिधा
नात् कर्तृत्वरूपफलावच्छिन्नस्य तादृशव्यापारस्य णिजर्थतामतेऽपि आश्रयोपरक्तस्य कर्तृत्वसामान्यतोभाना
निर्वाहेणाकर्त्तरणभिधानात्तृतीयोपपत्तिः आख्यातस्य धर्म्मवाचकत्वेऽपि कृतिविशिष्टबोधकत्वरूपस्य कर्त्रभिधा

मु·वा· तस्मात्तत्वात् चैत्रः पचतीत्यादौ न त्वया नैवं प्रश्नविशेषविशेष्यतयाकृतिविवक्षया चैत्रेण पचतीति स्यादिति
३९ वाच्यं आश्रयातिरिक्ताश्रयविशेषणतयाकृतिबोधनस्यैव कर्तृविधानरूपत्वात् तथा तदभिधाने च लक्षा।
39 तद्धितसमासानामेव प्रत्ययवत्तैरेवानभिधानं ह्यभिहितताविहन्तं इदं त्वत्र वक्तव्यं यद्यपि स्वतन्त्रव्यापारमात्रपरत्वे तो
यादेरनुशासनं तथापि लाघवात् कृतिरूप एव कर्तृत्वे तृतीयादेः शक्ति प्रचेतन व्यापारे निरूढलक्षणैवानुशा
सनस्यानादितात्पर्यमात्रग्राहकत्वात् लाघवसहकृतस्यैव चनादृशतात्पर्यस्य शक्तिकल्पकत्वात् व्यापारे।
तत्त्वेपि गौरवेणाशक्त्यसिद्धेः एवं च कर्तृत्वरूपकृतिबोधस्थले कारकान्तरव्यापारानधीनत्वं प्रतीय ३९
ते न त्वंतर्भावेण शक्तिकल्पने मानाभावः व्यापारलाक्षणिकेन कर्तृप्रत्ययेन लक्षणया तदंतर्भावेन व्या

पारबोधनादेवपूर्वोक्तातिप्रसंगवारणात् अन्यथातदंतर्भावेणकृतिशक्त्यावपितादृशातिप्रसंगस्यदुर्वारत्वा
दितिघटोजायतेओदनःसिध्यतीत्यादौसत्कार्यवादविद्वेषिणांनैयायिकानांकारकत्वेकर्तृत्वेचघटौदनादेर्यथा
श्रुतसूत्रानुसारेणदुरुपपादमेव मुख्यंचक्रियाकर्तृत्वंनक्रियानुकूलकृतिमात्रंपकक्रियाविषयककृतिनो
घन्नांतरीयकः क्रियांतरनिर्वाहकस्तत्कृतिमतस्तत्क्रियाकर्तृत्वाभावात् अतएवतत्रमत्रोभूतेननतन्मयाकृतमि
तिव्यपदेशश्चेतितत्क्रियाकारकत्वेसतितद्विषयिकायाकृतिस्तत्कर्तृत्वं अन्योद्देशेननाराचत्तेपाद्यत्रब्राह्म
णवधस्तत्रमरणानुकूलस्यनाराचक्षेपरूपव्यापारस्यकृतिविषयत्वेपिब्राह्मणमरणानुकूलव्यापारत्वेनतस्या
नभिसंहितत्वात् तेनरूपेणकृतिविषयत्वंनतादृशव्यापारस्येतिब्राह्मणवधत्वविशिष्टकर्तृत्वंनतादृशव्यापारकर्तृ

मु॰वा॰ ५० रितिनतस्यसंसृष्टप्रायश्चित्तं विशिष्टकर्तृताया एव संसृष्टप्रायश्चित्तप्रयोजकत्वात् अत एव संसृष्टप्रायश्चित्तप्र-
योजकस्यकर्तृव्यापारस्यलक्षणाभिप्रायेण हिंसालक्षणे मणिकृतो मरणोद्देशेनानुष्ठीयमानत्वादृष्टद्वारकत्ववि
शेषणयोरुपादानमितिमिश्राभिधानसंगतिः मरणोद्देशेनानुष्ठीयमानस्यव्यापारस्यावश्यंमरणानुकूल
व्यापारत्वेनप्रतिसंधानत्वात्तादृशरूपेणकृतिविषयत्वमितितद्विशेषणवतोव्यापारस्यनियमेनलक्षणत्वा-
त् तद्रूपस्यचालक्षणत्वनियमात् अथमरणोद्देशेनानुष्ठितस्यापिव्यापारस्ययत्रखड्गाभिघातत्वा-
दिनैवेष्टसाधनत्वकृतिसाध्यत्वधीविषयता नतुमरणानुकूलत्वविशेषिततद्रूपेणतत्रनमरणानु ५०
कूलत्वविशिष्टविषयिणीकृतिरितितादृशव्यापारकर्तुर्नैवधत्वविशि ॥ ॥ ॥

ष्टकर्तृत्वमितिकथमुक्तविशेषणस्यविशिष्टकर्तृतानिर्वाहकत्वंयदिचमरणोद्देशेनानुष्ठीयमानत्वस्यमरणानुकूल
त्वेनकृतिविषयत्वमेवार्थउपेयेयतेतदाव्यापारेतादृशविशेषणस्यतत्कर्तरिविशिष्टकर्तृतानिर्वाहकत्वेपिउक्तस्थले
खड्गाभिघातादौतादृशफलतृणाद्याभिउर्वीरैवतत्रसंपूर्णप्रायश्चित्तस्यनिर्वाहतयाफलतत्तायाआवेश्यकत्वात् नच
विशेषणाभूतफलनिष्ठोद्देश्यताख्यविषयतानिरूपकत्वेसतिव्यापारनिष्ठसाध्यतारूपविषयतानिरूपकत्वमेव
विशिष्टविषयकत्वंकृतेरित्युपदर्शितस्थलेऽनुकूलतासंबंधेनमरणवैशिष्ट्यस्यसाध्यतारूपकृतिविषय
तावच्छेदकत्वविरहेपिनविशिष्टकर्तृत्वानिर्वाहइतिमरणोद्देशेनानुष्ठीयमानत्वत्वस्यमरणकामनाथी
नकृतिविषयत्वरूपत्वेनैवेतिवाच्यं ब्राह्मणोनहन्यादित्यादौधात्वर्थतावच्छेदकस्यमरणस्यचोद्देश्यकत्वसंबंधे

कु॰वा॰ नह्यत्तावन्वयसंभवएवनिरुक्तविशिष्टकर्त्तृकत्वस्यनिषेधविधिविषयत्वसंभवात् व्यापारविशेषणतयोपस्थिता
४१ स्यचतस्यह्युक्तसंशेविशेविशेषणतयाऽन्वयस्यव्युत्पत्तिविरुद्धत्वात् अथमरणोपलक्षितव्यापारकर्त्तृत्वस्यतादृश
निषेधविषयत्वेपिनक्षतिः अन्योद्देशेननाशाचरितस्यापिब्राह्मणमरणोपधायकस्यनरकसाधनत्वात् परंत्वम
रणाद्रूपधायश्छिन्नविधेरेवतदविषयकत्वमुपपादनीयम् तच्चमरणोद्देशेनतदनुकूलव्यापारकर्त्तृतायाबोधकस्य
शब्दस्यतद्विधानेनभावएवोपपद्यतइतिचेत् एवमपिब्राह्मणमरणकानयायत्रतन्मरणानुकूलव्यापारानुष्ठा
नमपितत्फलांनरकामनाधीनतन्मरणानुकूलव्यापारत्वप्रकारकचिकीर्षयातदनुष्ठितंतत्रव्याप्तिरेतन्मतेऽव्या ४१
रेव तत्रापिसंसर्गस्यैवप्रायश्चित्तस्याचरणंलक्षतोपगमासंभवादिति मैवं यत्रह्रिमरणानुकूलव्यापारत्वेनकृति सा

यागादिधीस्तत्रैव यत्नव्यापारविशेषत्वेनैव तद्धीस्तत्त्वापि मरणरूपफलकामनाधीनव्यापारविषयिणी कृतिर्मरणा
नुकूलत्वेन व्यापारमवगाहते कृतेः कामनाविषयफलोपरागेणोपायविषयतोपगमात् विश्टं खलु फलभावेनोपग
मेयं यत्र तत्रेत्यभिकामनया भोजनं फलं न तु कामनयावगमनं ऽप्यवगाहमाना समूहालंबनकृतिस्तत्र तन्मयेगमनं करोती
तिव्यवहारापत्तेः उपायांशे फलस्यानुकूलत्वं संबंधः प्रकारो वेत्यस्मिन्देतत् एवं च मरणावच्छिन्नव्यापारविषयक
त्वमुभयत्रैव कृतेरिति विशेषणावच्छिन्नविषयककृतिमत्त्वरूपं विशिष्टकर्तृत्वमुभयस्थलेपवगनिष्प्रत्यूहं मरणोद्देश्ये
नानुष्ठीयमानत्वमपि मरणानुकूलत्वोपरागेण कृतिविषयत्वरूपमेव लक्षणघटकमिति न काचिदनुपपत्तिः यद्यप्य
दृष्टद्वारा पाकाद्यनुकूलकृतिमतोपि न पाकादिकर्तृत्वमिति तत्कर्तृत्वघटककृतिनिष्ठतदनुकूलत्वमेवादृष्टाद्वा

मु॰वा॰ रकत्वमपेक्षितं न तु क्रियानिष्ठफलानुकूलत्वे ऽदृष्टाद्वारकत्वमप्यपेक्षितमिति व्यापारनिष्ठमरणानुकूलत्वेऽदृष्टाद्वा
७२ रकत्वरूपमणिकारोक्तविशेषणस्य न कर्तृताघटकत्वं तथापि प्रतुश्रीयमानत्वप्रविष्टकतावेवादृष्टाद्वारकमरणा
७२ नुकूलत्वं विवक्षितं विशिष्टकर्तृत्वं च अदृष्टाद्वारकत्वविशेषितमरणानुकूलत्वेन कृतिविशेषणेन घटितमितिमि
श्राशयः तथा चैतन्मते पर्यवसितं हिंसात्वं प्रवृत्तिनिमित्तमरणरूपफलावच्छिन्नव्यापारत्वमेव न हिंस्यादित्यादेः फ
लविशिष्टस्वनिरूपितकर्तृत्वसंबंधेन हिंसाद्यर्थस्यानिष्टविशेषसाधनत्वं प्रतीयते श्येनस्य हिंसाद्यर्थत्वेऽपि न
तस्य तादृशाकारणतावच्छेदकसंबंधेन क्वचिदपि सत्त्वं तत्कर्तुरदृष्टाद्वारकानुकूलताघटितफलकर्तृत्वविरहेण विशि
ष्टकर्तृत्वादिति तानिष्टविशेषं प्रति हिंसात्वेन साधनत्वमिति न क्रियायां विध्यर्थान्वयमतेऽपि श्येनविशिष्टविध्यर्थवाधः वस्तु ७२ नःश्येनाउ

कूलकृतेर्मरणप्रयोजकत्वमेव न तु मरणकारणत्वमन्यथासिद्धत्वात् मरणोपलक्षितात्मकर्तृकत्वज्ञाभिधा-
नादिरूपवैरिवधं प्रत्येव हेतुतायावेदनबोधितत्वात् क्रियाजन्यकार्यैन तु क्रियानुकूलकृतिहेतुतानियमेऽपि व-
ज्ञाभिधानादावेव श्येने न कृतेर्हेतुत्वात् एवं चानिष्टविशेषफलजनकतावच्छेदकप्रत्यासत्तिप्रविष्टमरणानुकू-
लत्वं मरणजनकत्वमेव न तु प्रयोजकमतोऽदृष्टद्वारकत्वेन तत्र प्रवेशनीयमकारणत्वेपर्यन्तनिवेशलाभाये-
व तदुपादाने यदि च विशिष्टान्वयपरतायावेदस्यौत्सर्गिकत्वेन वधसाधनताबोधकश्रुत्याविशेषणीभूता-
मरणसाधनतापि श्येनस्य प्रमीयते तदापि श्येनानुकूलकृतेर्मरणसाधनत्वमप्रामाणिकमेव क्रियाजन-
ककृतेस्तज्जन्यजनकतानियमस्याप्रामाणिकत्वात् अथामोद्देशेन नाशावत्तेपकर्तृर्विशिष्टविषयककृतिमत्त्व

श्रु॰वा॰ चदितविशिष्टकर्तृत्वाविरहेपि यथाऽर्हं वयजन्यं पापं प्रायश्चित्तं च तथा श्येनकर्तुर्विशिष्टाकर्तृत्वेपि पापाईस्याव
श्यकत्वाद्बलवदनिष्टानुबंधित्वबाधोऽर्वारस्वेति चेन्न अकामकृतेप्यर्हं प्रायश्चित्तश्रवणेन मरणावच्छिन्नव्यापारस्य
४३ विषयतामनंतर्भाव्याविशिष्टजनककृतिमत्वसंबंधेन कृतपापेस्वतंत्रहेतुताकल्पनात् तद्बलेन विशिष्टाकर्तुः श्ये
43 नकर्तुर्हिंसाजन्यपापानुसक्तेः नचलाघवेन मरणोपलक्षितव्यापारजनकत्वमेव प्रत्यासत्तिमध्ये निविशतामिति वाच्यं
श्रुतार्थबाधापादकलाघवस्याप्रयोजकत्वात् वेदस्थले विशिष्टान्वयस्यौत्सर्गिकत्वेपि श्येनस्य मरणजनकत्वे विध्यर्थ
बाधप्रसंगेन मरणं प्रति श्येनस्यान्यथासिद्धतापत्त्योपगंतव्यतया तस्य जनकतागर्भहिंसस्पर्शतावच्छेदकरूपस्य तथापि सुपपादत्वाच्च नचयदि ४३
स्वर्गाभिधानतज्जनकादृष्टव्यवहितस्य श्येनस्य मरणेऽन्यथासिद्धत्वे तदाहंतकृतिव्यापारोपि तत्रान्यथासिद्धः स्यात् यस्य व्यापारो मरणेऽव्यवहितसाधनं त
त्तत्वहेतुः कृतिरेवान्यथासिद्धेति मरणकारणव्यापारकारणकृतिमत्वं

नकस्यापिदेवतः स्यादितिवाच्यं तंडुलविक्रयादिरूपफलस्यव्यवहितस्यापितद्धादिप्रक्षेपस्यतत्कारणदशायांप
चतीत्यादिव्यवहारानुरोधेनयथाऽनभ्यासिद्धत्वं तथाखड्गप्रक्षेपादिकारणदशायांहंतीतिव्यपदेशानुरोधेन
तस्यव्यवहितस्यापिमरणेनाभ्यासिद्धत्वमवश्यमभ्युपेयमितिसामंजस्यात् तंडुलादिक्रयणदशायांपच।
तीत्यादिव्यवहाराभाववत् खड्गादिनिर्माणदशायांहंतीतिव्यवहाराभावात् तद्व्यापारोपरमणेऽभ्यासिद्धतया
नहिंसा व्याघ्रमरणोद्देशेनकृतोयंत्रार्पणादिस्तुयथादेवात्तत्रगतादिमरणेपिनतद्धिंसारूपत्वंतथानव्याघ्रादि
हिंसारूपोपितत्कारणदशायांहंतीत्यप्रयोगात् यतथात्वेपितन्मरणोद्देशपकाद्दृष्टाद्वारकतन्मरणप्रयोजका।
कृतिजन्यव्यापारस्यापिहिंसात्वन्नापजनकत्वाडकस्थलेगोवधाभिसंधानेगोवधप्रायश्चित्ताचरणमित्यव।

सु·वा·

४४

धेयं एवंचैत्रः पचतीत्यादौ विषयतावच्छेदककर्तृत्वबोधनिर्वाहाय यथाकृतौ पाकादेरुपधायकत्वविषयत्वोभ
यसंबंधेनान्वयः विषयतायास्संबंधत्वेप्युपधायकतानिवेशआवश्यकः पाकाद्यनिष्पत्तिस्थलेपचतिप
चतीत्यादिप्रयोगस्यप्रामाण्यवारकत्वात् तथाचैत्रेणपच्यतइत्यादावपितृतीयार्थकृतेर्जन्यविषयत्वोभ
यसंबंधेनान्वयबोधः कृतिजन्यत्वस्यतृतीयार्थत्वेजन्यत्वस्यसंबंधमध्यप्रवेशस्वनिरूपकविषयत्वंनिवेश
नीयं कृतिविषयत्वमेववान्यतृतीयार्थः स्वनिरूपकजन्यत्वविषयतायास्संबंधमध्येंतर्भावनीयं काष्ठेनप
चतीत्यादौकरणत्वंतृतीयार्थः तच्चव्यापारवत्कारणत्वंव्यापारेकर्तृसमानत्वंतृतीयार्थः तच्चकर्तृव्यापारानधी ४४
नत्वंनिवेशनीयं अन्यथाकर्तुरपिकरणतापत्त्याचैत्रश्चैत्रेणपचतिकाष्ठंचैत्रेणपचतीत्यादिप्रयोगापत्तेः।

नचकर्तृत्वंचेष्टादिरूपव्यापारस्यतदीयकृत्यादिरूपव्यापाराधीनतयातद्विशेषणदानेपिकर्तुः करणत्वंदुर्वार
मेवेतिवाच्यं स्वभिन्नत्वेनकर्तृविशेषणीयत्वात् यत्रैकैवपाकादिक्रियाचैत्रेणकाष्ठादिनामैत्रेणतुषादि
प्रक्षेपेणनिष्पाद्यतेतत्रचैत्रस्तुषैर्मैत्रः काष्ठैः पचतीतिप्रसंगः समभिव्याहृतकर्तृव्यापाराधीनत्वस्यत
त्करणव्यापारेभानमुपगम्यवारणीयः नचसमभिव्याहृतकर्त्रन्तर्भावेणतृतीयार्थत्वेकर्त्रसमभिव्या
हारस्थलेकरणेतृतीयायाअप्रयोगापत्तिरितिवाच्यं तत्रापिहेतावितिसूत्रेणहेतुतामात्रार्थकतृतीयासं
भवात् धनेनकुलंविद्ययायशइत्यादिवत् नहितत्रकरणेतृतीयाक्रियायोगाभावात् नचैवमुक्तस्थलेचै
त्रस्तुषैः पचतीतिप्रयोगस्यहेतावितितृतीयाबलादापत्ताविष्टापत्तिंविनोत्तराभावात्समभिव्याहृतकर्त्रं।

सु॰वा॰ ५५ तर्भावस्यकरणेस्वतंत्रतृतीयानुशासनस्यैववैयर्थ्यमितिवाच्यं उक्तस्थलेपाकेतद्घटकत्वाभाववाधेपिचैत्रस्त
षेणनपचतिकिंतदारुणैवेतिप्रयोगोपपत्तयेकरणत्वेनसमभिव्याहृतकर्त्रंतर्भावेणतृतीयायाश्शक्तिकल्प्य॰
नायाआवश्यकत्वात् तद्ग्राहकतयैवकरणेतृतीयानुशासनस्यावश्यकत्वात् ग्रौरैः शातितपत्रोयमित्यादौ॰
तृतीयायाः कारकविभक्तित्वप्रवतदर्थान्वितार्थकशातादिपदेनसमासस्यसाधुतानिर्वाहाच्च नचतृतीया
यास्समभिव्याहृतकर्त्रंतर्भावेणकरणत्वार्थकत्वे तत्रसमभिव्याहृतकर्त्रभावादकारकविभक्तित्वे करणेतृती
यानुशासनेपिदुर्वारणीयत्वात् वस्तुतस्तुसमभिव्याहृतकर्तृव्यापाराधीनत्वे व्यापारवत्करणत्वेचतृतीया॰
याश्शक्तिद्वयंकर्त्रसमभिव्याहारस्थलेचव्यापारवत्कारणत्वमात्रंप्रतीयते कर्तृसमभिव्याहारस्थलेचव्यापा ५५

रे तद्व्यापाराधीनत्वमपीतिसामंजस्यं एवंहेत्वनुशिष्टतृतीयाया अकर्तृगुणइत्यनेनबाधनात् करणत्ववि
वक्षायांधनवताश्रणेनबद्धोयमित्यत्रतृतीयायाउपपत्तयेकरणेतृतीयानुशासनस्यावश्यकताबोध्या कारण
